# Navagrahasukta..

## ॥ नवग्रहसूक्तम् ॥

॥ गणेशवन्दना ॥

ॐ शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनम् ध्यायेत्सर्व विघ्नोपशान्तये ॥

॥ प्राणायामम् ॥

ॐ भूः । ॐ भुवः । ओ३ं सुवः ।
ॐ महः । ॐ जनः । ॐ तपः । ओ३ं सत्यम् ।
ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि ।
धियो यो नः प्रचोदयात् ।
ओमापो ज्योतीरसोऽमृतं ब्रह्म भूर्भुवस्सुवरोम् ॥

॥ संकल्पः ॥

ममोपात्तस्समस्तस्दुरितक्षयद्वारा श्रीपरमेश्वर प्रीत्यर्थं
आदित्यादि नवग्रह देवता प्रसाद सिद्ध्यर्तं आदित्यादि
नवग्रह नमस्कारान् करिष्ये ॥

॥ मन्त्राणि ॥

ॐ आसत्येन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च ।
हिरण्मयेन सविता रथेनाऽऽदेवो याति भुवना विपश्यन् ।
अग्निं दूतं वृणीमहे होतारं विश्ववेदसम् ।
अस्य यज्ञस्य सुक्रतुम् ॥
येषामीशे पशुपतिः पशूनां चतुष्पदामुत च द्विपदाम् ।
निष्क्रीतोऽयं यज्ञियं भागमेतु रायस्पोषा यजमानस्य सन्तु ॥
ॐ अधिदेवता प्रत्यधिदेवता सहिताय आदित्याय नमः ॥ १ ॥

ॐ आप्यायस्व समेतु ते विश्वतस्सोम वृष्णियम् ।
भवा वाजस्य संगथे ॥
अप्सुमे सोमो अब्रवीदन्तर्विश्वानि भेषजा ।
अग्निञ्च विश्वशंभुवमापश्च विश्वभेषजीः ।
गौरी मिमाय सलिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी ।
अष्टापदी नवपदी बभूवुषी सहस्राक्षरा परमे व्योमन् ।
ॐ अधिदेवता प्रत्यधिदेवता सहिताय सोमाय नमः ॥ २ ॥

ॐ अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयम्।
अपाꣳ रेताꣳसि जिन्वति।
स्योना पृथिवि भवाऽनृक्षरा निवेशनि। यच्छानश्शर्म सप्रथाः।
क्षेत्रस्य पतिना वयꣳहितो नेव जयामसि।
गामश्वं पोषयिन्त्वा स नो मृडातीदृशे ॥
ॐ अधिदेवता प्रत्यधिदेवता सहिताय अङ्गारकाय नमः ॥३॥

ॐ उद्बुध्यस्वाग्ने प्रतिजागृह्येनमिष्टापूर्ते सꣳसृजेथामयञ्च।
पुनः कृण्वꣳस्त्वा पितरं युवानमन्वाअꣳसीत्वयि तन्तुमेतम् ॥
इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढमस्यपाꣳ सुरे ॥
विष्णो रराटमसि विष्णोः पृष्ठमसि विष्णोश्श्नप्त्रेस्थो
विष्णोस्स्यूरसि विष्णोर्ध्रुवमसि वैष्णवमसि विष्णवे त्वा।
ॐ अधिदेवता प्रत्यधिदेवता सहिताय बुधाय नमः ॥४॥

ॐ बृहस्पते अतियदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु।
यद्दिदयच्चवसर्तप्रजात तदस्मासु द्रविणन्धेहि चित्रम् ॥
इन्द्रमरुत्व इह पाहि सोमं यथा शार्याते अपिबस्सुतस्य।
तव प्रणीती तव शूरशर्मन्नाविवासन्ति कवयस्सुयज्ञाः ॥
ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतस्सुरुचो वेन आवः।
सबुध्निया उपमा अस्य विष्ठास्सतश्च योनिमसतश्च विवः
ॐ अधिदेवता प्रत्यधिदेवता सहिताय बृहस्पतये नमः ॥५॥

ॐ प्रवश्शुक्राय भानवे भरध्वम्। हव्यं मतिं चाग्नये सुपूतम् ॥
यो दैव्यानि मानुषा जनूꣳषि। अन्तर्विश्वानि विद्म ना जिगाति ॥
इन्द्राणीमासु नारिषु सुपत्नीमहमश्रवम्।
न ह्यस्या अपरंचन जरसा मरते पतिः ॥
इन्द्रं वो विश्वतस्परि हवामहे जनेभ्यः। अस्माकमस्तु केवलः ॥
ॐ अधिदेवता प्रत्यधिदेवता सहिताय शुक्राय नमः ॥६॥

ॐ शन्नो देवीरभिष्टय आपो भवन्तु पीतये। शंयोरभिस्रवन्तु नः ॥
प्रजापते न त्वदेतन्यन्यो विश्वा जातानि परिता बभूव।
यत्कामास्ते जुहुमास्तन्नो अस्तु वयꣳस्याम पतयो रयीणाम्।
इमं यमप्रस्तरमाहि सीदाऽङ्गिरोभिः पितृभिस्संविदानः।
आत्वा मन्त्राः कविशस्ता वहन्त्वेना राजन् हविषा मादयस्व॥
ॐ अधिदेवता प्रत्यधिदेवता सहिताय शनैश्चराय नमः ॥७॥

ॐ कया॑ नश्चि॒त्र आभु॑वदू॒ती स॒दावृ॑ध॒स्सखा᳚ ।
कया॒ शचि॑ष्ठया वृ॒ता ।
आऽयङ्गौः पृश्नि॑रक्रमी॒दस॑नन्मा॒तरं॒ पुनः॑ । पि॒तरं॑च प्र॒यन्त्सुवः॑ ।
यत्ते॑ दे॒वी निर्ऋ॑तिराब॒बन्ध॒ दाम॑ ग्री॒वास्व॑वि च॒र्त्यम् ।
इ॒दन्ते॒ तद्विष्या॒म्यायु॑षो॒ न मध्या॒दथा॒जीवः॒ पि॒तुम॑द्धि॒ प्रमु॑क्तः ॥
ॐ अधिदेवता प्रत्यधिदेवता सहिताय रह॒वे नमः॑ ॥ ८ ॥

ॐ के॒तुङ्कृ॒ण्वन्न॑के॒तवे॒ पेशो॑ मर्या अपे॒शसे᳚ । समु॒षद्भि॑रजायथा ॥
ब्र॒ह्मा दे॒वाना᳚ं प॒दवीः॑ क॒वीना॒मृषि॒र्विप्रा॑णां महि॒षो मृ॒गाणा᳚म् ।
श्ये॒नोगृध्रा॑णा॒ꣴस्वधि॑ति॒र्वना॑ना॒ꣳ सोमः॑ प॒वित्र॒मत्ये॑ति॒ रेभन्॑ ।
सचि॑त्र चि॒त्रं चि॒तय॑न्तम॒स्मे चित्र॑क्षत्र चि॒त्रत॑मं वयो॒धाम् ।
च॒न्द्रं र॒यिं पु॑रु॒वीर᳚म् बृ॒हन्तं॒ चन्द्र॑चन्द्राभिर्गृ॒णते यु॑वस्व ॥
ॐ अधिदेवता प्रत्यधिदेवता सहितेभ्यः केतु॑भ्यो॒ नमः॑ ॥ ९ ॥

॥ ॐ आदित्यादि नवग्रह देव॑ताभ्यो॒ नमो॒ नमः॑ ॥
॥ ॐ शान्ति॒ः शान्ति॒ः शान्तिः॑ ॥

Encoded with Accents by Rajagopal Iyer rajsand@yahoo.com

---

Please send corrections to sanskrit@cheerful.com
Last updated July 7, 2004